श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये सप्ताशीतितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये सप्ताशीतितमं दशकम् ॥

## कुचेलोपाख्यानम्

कुचेलनामा भवतः सतीर्थ्यतां
    गतः स सान्दीपनिमन्दिरे द्विजः।
त्वदेकरागेण धनादिनिस्स्पृहो
    दिनानि निन्ये प्रशमी गृहाश्रमी ॥ **87.1** ॥

समानशीलाऽपि तदीयवल्लभा
    तथैव नो चित्तजयं समेयुषी।
कदाचिदूचे बत वृत्तिलब्धये
    रमापतिः किं न सखा निषेव्यते ॥ **87.2** ॥

इतीरितोऽयं प्रियया क्षुधार्तया
    जुगुप्समानोऽपि धने मदावहे।
तदा त्वदालोकनकौतुकाद्ययौ
    वहन् पटान्ते पृथुकानुपायनम् ॥ **87.3** ॥

गतोऽयमाश्चर्यमयीं भवत्पुरीं
    गृहेषु शैब्याभवनं समेयिवान्।
प्रविश्य वैकुण्ठमिवाप निर्वृतिं
    तवातिसम्भावनया तु किं पुनः ॥ **87.4** ॥

प्रपूजितं तं प्रियया च वीजितं
    करे गृहीत्वाऽकथयः पुराकृतम्।

यदिन्धनार्थं गुरुदारचोदितै -
    रपर्तुवर्षं तदमर्षि कानने ॥ **87.5** ॥

त्रपाजुषोऽस्मात् पृथुकं बलादथ
    प्रगृह्य मुष्टौ सकृताशिते त्वया।
कृतं कृतं नन्वियतेति संभ्रमा -
    द्रमा किलोपेत्य करं रुरोध ते ॥ **87.6** ॥

भक्तेषु भक्तेन स मानितस्त्वया
    पुरीं वसन्नेकनिशां महासुखम्।
बतापरेद्युर्द्रविणं विना ययौ
    विचित्ररूपस्तव खल्वनुग्रहः ॥ **87.7** ॥

यदि ह्ययाचिष्यमदास्यदच्युतो
    वदामि भार्यां किमिति व्रजन्नसौ।
त्वदुक्तिलीलास्मितमग्नधीः पुनः
    क्रमादपश्यन्मणिदीप्रमालयम् ॥ **87.8** ॥

किं मार्गविभ्रंश इति भ्रमन् क्षणं
    गृहं प्रविष्टः स ददर्श वल्लभाम्।
सखीपरीतां मणिहेमभूषितां
    बुबोध च त्वत्करुणां महाद्भुताम् ॥ **87.9** ॥

स रत्नशालासु वसन्नपि स्वयं
    समुन्नमद्भक्तिभरोऽमृतं ययौ।
त्वमेवमापूरितभक्तवाञ्छितो
    मरुत्पुराधीश हरस्व मे गदान् ॥ **87.10** ॥

॥ इति श्रीमन्नारायणीये सप्ताशीतितमं दशकं समाप्तम् ॥